# राजकीय महाविद्यालय, अमोडी, चम्पावत

## TOPIC-दशरूपक

Presented by- Atul Kumar Mishra
Assistant Professor, Sanskrit
Mb. 9532510299, Email. atulsvdv@gmail.com



संस्कृत

## ❖ अवस्था-

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फ़लार्थिभिः ।

आरम्भयत्नप्राप्त्याशानियताप्तिफ़लागमाः ॥

### १. आरम्भ-

औत्सुक्यमात्रामारम्भः फ़ललाभाय भूयसे ।

(इदमहं संपादयामित्यध्यवसायमात्रमारम्भ इत्युच्यते)

### २. प्रयत्न-

प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः ।

(तस्य फ़लस्य अप्राप्तौ उपाययोजनादिरूपश्चेष्टाविशेषः प्रयत्नः)

संस्कृत

### ३. प्राप्त्याशा-

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।

### ४. नियताप्ति-

अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता ।

(अपायाभावादवधारितैकान्ता फ़लप्राप्तिर्नियताप्तिरिति)

### ५. फ़ल-

समग्रफ़लसंपत्तिः फ़लयोगो यथोदितः ।

(रत्नावल्यां रत्नावलीलाभचक्रवर्तित्वावाप्तिरिति)

- अर्थप्रकृति नाटकीय इतिवृत्त का भौतिक विभाजन है ।
- कार्यावस्था नायक की मानसिक दशा की दृष्टि से वस्तु का मनोवैज्ञानिक वि०

संस्कृत

❑ सन्धि-

अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ।
यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥

❑ सन्धिलक्षणमाह-

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ।

(एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजन सम्बन्धः सन्धिः)

➢ के पुनस्ते सन्धयः:-

मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः । अवमर्श(विमर्श), उपसंहृति(निर्वहण)

संस्कृत

## १. मुखसन्धि-

**मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवाः ।**

**अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥**

- बिभिन्न प्रकार के प्रयोजनों एवं रसों को उत्पन्न करने वाली बीजोत्पत्ति ।

भेद-

बीजन्यासः उपक्षेपः स्यात् तद्बाहुल्यं परिक्रिया । तन्निष्पत्तिः परिन्यासो गुणाख्यानं विलोभनम् ॥

संप्रधारणमर्थानां युक्तिः प्राप्ति सुखागमः । बीजागमः समाधानम् विधानं सुखदुःखकृत् ॥

परिभावोद्भूतावेशः उद्भेदो गूढभेदनम् । करणं प्रकृतारम्भः भेदः प्रोत्साहना मता ॥

संस्कृत

## २. प्रतिमुख-

**लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्।**
**बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश॥**

(तस्य बीजस्य किञ्चिल्लक्ष्यः किञ्चिदलक्ष्यः इवोद्भेदः प्रकाशनं तत्प्रतिमुखम्)।

- मुख सन्धि में बीज स्थापित किया जाता है। प्रतिमुख सन्धि में आकर वह प्रस्फुटित होने लगता है।
- भेद-

रत्यर्थेहा विलासः स्यात् दृष्टनष्टानुसर्पणम्। विधूतं स्यादरतिः तच्छमः शमः॥
परिहासवचो नर्म धृतिस्तज्जा द्युतिर्मता। उत्तरा वाक्प्रगमनम् हितरोधो निरोधनम्॥
पर्युपास्तिरनुनयः पुष्पं वाक्यं विशेषवत्। उपन्यासस्तु सोपायं वज्रं प्रत्यक्षनिष्ठुरम्॥
चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते॥

संस्कृत

3. गर्भ-

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।
द्वादशाङ्कः पताका स्यान्न वा स्यात्प्राप्तिसंभवः ॥

भेद-

अभूताहरणं छद्म मार्गस्तत्वार्थकीर्तनम् । रूपं वितर्कवद्वाक्यं सोत्कर्षं स्यादुदाहृतिः ॥

क्रमः संचिन्त्यमानाप्तिः भावज्ञानमथापरे । संग्रहः सामदनोक्तिः अभ्यूहो लिङ्गतोऽनुमा ॥

अधिबलमभिसन्धिः संरब्धं तोटकं वचः । तोटकस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः ॥

संरब्धवचनं यत्तु तोटकं तदुदाहृतम् । उद्वेगोऽरिकृताः भीतिः शङ्कात्रासौ च विभ्रमः ॥

गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तिताः ॥

संस्कृत

४. अवमर्श-

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात् ।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः ॥

अवमर्शनमवमर्शः पर्यालोचनम् ।
भेद-१२-

दोषप्रख्यापवादः स्यात् सफ़ेटो रोषभाषणम् । विद्रवो वधबन्धादिः द्रवो गुरुतिरस्कृतिः ।

विरोधशमनं शक्तिः तर्जनोद्वेजने द्युतिः । गुरुकीर्तनं प्रसङ्गः छलनं चावमाननम् ॥

व्यवसायः स्वशक्त्युक्तिः संरब्धानां विरोधनम् । सिद्धामन्त्रणतो भाविदर्शिका स्यात्प्ररोचना ॥

विकत्थना विचलनम् आदानं कार्यसंग्रहः ॥

संस्कृत

5. उपसंहृति-

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्॥

भेद-

सन्धिर्बीजोपगमनं विबोधः कार्यमार्गणम्। ग्रथनं तदुपक्षेपोऽनुभूताख्या तु निर्णयः॥

परिभाषा मिथो जल्पः प्रसादः पर्युपासनम्। आनन्दो वाञ्छितावाप्तिः समयो दुःखनिर्गमः॥

कृतिर्लब्धार्थशमनं मानाद्याप्तिश्च भाषणम्। कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने॥

वराप्तिः काव्यसंहार प्रशस्तिः शुभशंसनम्॥

➢ उक्ताङ्गानां चतुः षष्टिः षोढा चैषां प्रयोजनम्।

संस्कृत

- कानि पुनस्तानि षड्प्रयोजनानि-

इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः ॥

पुनर्वस्तुविभागमाह-

द्वेधा विभागः कर्त्तव्यः सर्वस्यापीह वस्तुनः।

सूच्यमेव भवेत्किंचिद्दृश्यश्रव्यमथापरम् ॥

कीदृग्सूच्यं कीदृग्दृश्यश्राव्यमित्याह्-

नीरसोऽनुचितस्त्र संसूच्यो वस्तुविस्तरः।

दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः ॥

सूच्यस्य प्रतिपादनप्रकारमाह-

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।

विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ॥

संस्कृत

१. विष्कम्भक-

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥

स द्विविधः-

एकानेककृतः शुद्धः सङ्कीर्णो नीचमध्यमैः।

२. प्रवेशकः-

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः॥

३. चूलिका-

अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना।

## संस्कृत

४. अङ्कास्य-

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।

५. अङ्कावतार-

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः।
एभिः संसूचयेत्सूच्यं दृश्यमङ्कैः प्रदर्शयेत्॥

पुनस्त्रिधा वस्तुविभागमाह-

नाट्यधर्ममपेक्ष्यैतत्पुनर्वस्तु त्रिधेष्यते।।

केन प्रकारेण त्रैधं तदाह-

सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च।

तत्र-

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्

## संस्कृत

नियतश्राव्य-

द्विधाऽन्यनाट्यधर्माख्यं जनान्तमपवारितम् ।

१. जनान्तिक-

त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ।

अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥

२. अपवारितम्-

रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ।

आकाशभाषित-

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।

श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥


Thank
You
atulsvdv@gmail.com